# Hymn to Goddess Renuka

# રેણુકાસ્તોત્રમ્

## Document Information

Text title : reNukAstotram from stotrasamuccaya Aithal 1969

File name : reNukAstotram.itx

Category : devii, reNukA, stotra, devI

Location : doc_devii

Author : Vishnudas

Transliterated by : Sridhar Seshagiri sridhar.seshagiri at gmail.com, Kaushal S. Kaloo kaushalskaloo at gmail.com

Proofread by : Sridhar Seshagiri sridhar.seshagiri at gmail.com

Description-comments : reNukAstotram from stotrasamuccaya Aithal 1969

Latest update : June 22, 2013

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 28, 2022

*sanskritdocuments.org*

# રેણુકાસ્તોત્રમ્

શ્રીગણેશાય નમઃ ।
પાકામૃતાંશુમકુટાભરણા ભવાની
શોકાપહા નતજનસ્ય શુભાખિલાઙ્ગી ।
કોકાકૃતિસ્તનભરા કુશલાનિ નિત્યં
મૂકામ્બિકા મમ તનોતુ મુનીન્દ્રવન્દ્યા ॥

શ્લોકસ્યાદ્યન્તયોર્વાગ્ભવમુચ્ચાર્ય પઠેદિતિ સમ્પ્રદાયઃ ॥ ૐ ॥

કાલાગ્ન્યાદિ શિવાવસાનમખિલં તે ગુલ્ફદઘ્નં શિવે
મૂર્તિં કીર્તયિતું ન કસ્ય રસના લજ્જામ્બુધૌ મજ્જતિ ।
તસ્માત્ ત્વચ્ચરણૈકદેશનખરજ્યોતિઃસ્ફુલિઙ્ગા ઇવ
સ્ફૂર્જન્તિ પ્રભવિષ્ણવશ્ચ સતતં તે પદ્મનાભાદયઃ ॥ ૧॥

કલ્પઃ કોઽપિ સ શામ્ભવો વિજયતે માતસ્ત્વયા કલ્પિતો
યત્રાનલ્પવિકલ્પજાલવિમુખઃ કશ્ચિદ્દ્વિપશ્ચિત્ પરઃ ।
સા ત્વં સત્ત્વવતામપીહ સુલભા નૈવાસિ કિં સ્તૂયસે
સ્વચ્છન્દં શિશવો યથા તવ પુનઃ ક્રીડન્તિ વેદા ઇમે ॥ ૨॥

લીલાચામરધારિણીસહચરીગત્યા મહાસિદ્ધયો
નૂનં વઞ્ચયિતું સ્ફુરન્તિ ભવતીકારુણ્યશૂન્યં જનમ્ ।
અમ્બ ત્વન્નયનાઞ્ચલં કરુણયા યસ્મિન્ પરિક્રીડતે
તસ્ય દ્વારિ નિવારિતોઽપિ કુરુતે સેવાં સુરાણાં ગણઃ ॥ ૩॥

આ પાતાલતલાત્ ફણીશ્વરશિરોરત્નાંશુનીરાજિતા-
દા સર્વજ્ઞનિકેતનાદપિ શિખાયૌતાંશુધૌતાઙ્ગણાત્ ।
એકચ્છત્રમવાપ્ય વૈભવમહો દીવ્યન્તિ તે સન્તતં
યે સન્ધ્યાચલનિશ્ચલં તવ પદં ધ્યાયન્તિ ગાયન્તિ ચ ॥ ૪॥

યે ત્વામમ્બ પલાશબિલ્વકુસુમૈરુલ્લાસિભિર્મલ્લિકા-

પુષ્પૈર્વા વનમલ્લિકાવિરચિતૈરુદ્દામભિર્દામભિઃ ।
મુગ્ધોન્મીલિતમાલતીભિરભિતઃ સમ્પૂજયન્ત્યાદરાત્
તેષામુદ્ધતસૌરભા પ્રતિદિનં વ્યાજૃમ્ભતે ભારતી ॥ ૫॥

ત્વાં સહ્યાચલમૌલિસુસ્થિતપદાં શ્રી-એકવીરામ્બિકે
યે લિમ્પન્તિ સચન્દ્રચન્દનરસૈસ્તેષાં સુધાસ્રાવિણી ।
વાણીવિસ્મયવર્ણ્યમાનગિરિશવ્યાલોલગઙ્ગાજલ-
સ્વચ્છન્દોર્મિપરમ્પરાવિજયિની વાણી નરીનૃત્યતિ ॥ ૬॥

યે ત્વાં બ્રાહ્મમુહૂર્તનિર્મલધિયસ્ત્વાધારતશ્ચિન્તય-
ન્ત્યૂર્ધ્વં મૂર્ધ્નિ સરોરુહેઽતિધવલે પીયૂષધારાવૃતે ।
તે મૃત્યું સહસા વિજિત્ય રચયન્ત્યુચ્ચૈર્ગતિં નિત્યશઃ
પ્રત્યાદિષ્ટપુરઃસુધાકરસુધાહમ્ભાવસમ્ભાવિતાઃ ॥ ૭॥

યસ્ત્વાં પશ્યતિ તસ્ય નશ્યતિ મહાપાપાન્ધકારઃ ક્ષણાત્
કિં ચાર્ધાદપરે પુરાણપુરુષપ્રાણપ્રિયે પાર્વતિ ।
મૂર્ધ્નસ્તસ્ય તતો ભવેત્ કૃતધિયઃ શ્રી-એકવીરામ્બિકે
દૃશ્યન્તે ન મનાગપીહ યદિયં પ્રત્યક્ષમુદ્યોતસે ॥ ૮॥

કિં યોગેન કિમર્ચનેન કિમથ જ્ઞાનેન કિં કર્મણા
કિં ધ્યાનેન કિમિજ્યયા કિમથવા દાનેન કિં દીક્ષયા ।
દૃશ્યન્તે યદિ સહ્યશૈલશિખરશ્રીગર્વિતાઃ સર્વદા
માતઃ પાર્વતિ રેણુકે તવ પદામ્ભોજપ્રભાવિભ્રમાઃ ॥ ૯॥

હે સહ્યાચલનિત્યકેલિરસિકે કર્પૂરકસ્તૂરિકા-
વિન્યસ્તાગરુકુઙ્કુમૈર્મલયજૈસ્ત્વં ચર્ચિતાભ્યર્ચિતા ।
તે દીવ્યન્તિ સુરેન્દ્રમુખ્યવિબુધશ્રેણીકિરીટસ્ફુર-
ન્માણિક્યપ્રતિબિમ્બિતારુણપદસ્થાઃ સમ્પ્રદાઃ સમ્પદામ્ ॥ ૧૦॥

હે સહ્યાદ્રિવિનિદ્રલિઙ્ગવપુષિ શ્રી-એકવીરામ્બિકે
ત્વાં કૃષ્ણાગરુગુગ્ગુલુપ્રભૃતિભિર્યે ધૂપયન્ત્યાદરાત્ ।
તે કૈલાસનિવાસિનીભિરભિતઃ સઞ્ચારિતૈશ્ચારુભિ-
ર્લીલાચામરમારુતૈશ્ચિરતરં નન્દન્તિ રુદ્રા ઇવ ॥ ૧૧॥

માતઃ શામ્ભવિ જૃમ્ભિતામૃતશિલાલિઙ્ગાત્મિકે રેણુકે
ત્વાં સહ્યાદ્રિશિરોવિહારસુલભાં નીરાજયન્ત્યાદરાત્ ।
તે વૃન્દારકવૃન્દવન્દિતપદાશ્ચન્દ્રાર્કચૂડામણિ-

જ્યોતિર્મેદુરમન્દિરાઙ્ગણભુવો ભૂતિં લભન્તેઽદ્ભુતામ્ ॥ ૧૨॥

દૂરાદઙ્ગણરઙ્ગસઙ્ગતરજોરાજીવિરાજદ્વપુ-
સ્તુભ્યં યઃ પ્રણિપત્તિમમ્બ કુરુતે કશ્ચિત્ કદાચિત્ ક્વચિત્ ।
સમ્પ્રાપ્ય શ્રિયમિન્દુસુન્દરયશઃસન્દોહનિષ્યન્દિની-
મન્તે નિર્વિષયં સ્વયં પ્રવિશતિ શ્રીશામ્ભવં વૈભવમ્ ॥ ૧૩॥

ત્વામુદ્દિશ્ય કદાપિ કોઽપિ કિમપિ ક્વાપિ પ્રપદ્યન્ નરો
ભક્ત્યાવેશવશીકૃતો જપતિ વા યો યજ્જુહોત્યાદરાત્ ।
તત્ તસ્યાક્ષયમેવ દેવિ ભવતિ સ્વર્ગાપવર્ગપ્રદં
ત્વન્નામસ્મરણં ગતો વિજયતે સર્વોઽપિ શર્વો જનઃ ॥ ૧૪॥

માતસ્ત્વચ્ચરણેન યાસ્યતિ ચિરં રુદ્રોઽપિ ભદ્રાશય-
શ્ચૂડાચન્દ્રકલામરીચિનિચયૈરાચાન્તરત્નાસનૈઃ ।
તત્ત્વાનામુપરિ સ્થિતો વિજયતે વામાદિભિર્નામભિઃ
શ્રીકામેશ્વરિ દક્ષપુત્રિ ગિરિજે ત્વં રેણુકે રક્ષ મામ્ ॥ ૧૫॥

માતર્ભૈરવિ ભર્ગપત્નિ ગિરિજે ગાયત્રિ ગોત્રાત્મિકે
દુર્ગે ગૌરિ સરસ્વતિ ત્રિણયને શ્રીસિદ્ધલક્ષ્મી ધૃતે ।
નિત્યે મૃત્યુવિકારહારિણિ શિવે શ્રી-એકવીરામ્બિકે
સોઽહં તે શરણાગતઃ કરુણયા ત્વં રેણુકે રક્ષ મામ્ ॥ ૧૬॥

ઇતિ શ્રીરેણુકાસ્તોત્રં સમાપ્તઃ ॥

પાકામૃતાંશુમકુટાભરણા ભવાની
શોકાપહા નતજનસ્ય શુભાખિલાઙ્ગી ।
કોકાકૃતિસ્તનભરા કુશલાનિ નિત્યં
મૂકામ્બિકા મમ તનોતુ મુનીન્દ્રવન્દ્યા ॥

શ્લોકસ્યાદ્યન્તયોર્વાગ્ભવમુચ્ચાર્ય પઠેદિતિ સમ્પ્રદાયઃ ॥ ૐ॥

Encoded and proofread by Sridhar Seshagiri sridhar.seshagiri at gmail.com
Reencoded independently by Kaushal S. Kaloo kaushalskaloo at gmail.com

*Hymn to Goddess Renuka*

pdf was typeset on July 28, 2022

Please send corrections to *sanskrit@cheerful.com*